A (Printed Pages 3)

# A-170

## बी. ए. (प्रथमवर्षम्) परीक्षा, 2015

## संस्कृतम्

### प्रथमप्रश्नपत्रम्

### (संस्कृत काव्यं काव्यशास्त्रञ्च)

समयावधिः : घण्टात्रयम् पूर्णाङ्कः : 50

**निर्देश :** **पञ्च** प्रश्नाः समाधेयाः। **प्रथमः प्रश्नोऽनिवार्यः**। प्रतिवर्गम् एकैकस्य प्रश्नोत्तरं देयम्।

1. अधोलिखितानां लघूत्तराणि लिख्यन्ताम्- 2×10=20

(क) चतुर्वर्गः

(ख) काव्यस्वरूपम्

(ग) व्यञ्जना

(घ) अलंकारः

(ङ) माघः

(च) अभिधा

(छ) सर्गः

(ज) व्यभिचारीभावः

(झ) योग्यता

(ञ) वृहत्त्रयी

## प्रथमो वर्गः 7½

2. अधोलिखितयोः श्लोकयोः प्रसङ्गनिर्देशपुरस्सरं व्याख्या विधेया -

(क) मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।

पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः।।

(ख) मुखेन सा पद्मसुगन्धिना निशि प्रवेपमाना धरपत्रशोभिना।

तुषारवृष्टिक्षत पद्मसम्पदां सरोजसन्धायमिवा करोदपाम् ।।

3. अधोलिखितस्य सूक्तिद्वयस्य सप्रसङ्गं भावार्थः लिख्यताम्-

(क) 'प्रियेषु सौभाग्यफला हि चारूता'।

(ख) 'न रत्नमन्विष्यति मृग्यते हि तत्'।

## द्वितीयो वर्ग ः 7½

4. संस्कृत भाषया प्रसङ्गनिर्देशपूर्वकं व्याख्या विधीयताम् -

विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः।

दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः।।

5. संस्कृत भाषया प्रसङ्गनिर्देशपूर्वकं व्याख्या विधीयताम्

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः।

न संहतास्तस्य न भिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ।।





## तृतीयो वर्ग ः 7½

6. अधोलिखितयोः श्लोकयोः प्रसङ्गनिर्देशपूर्वकं व्याख्या विधीयताम् -

(क) चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम् ।

विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः।।

(ख) अथ प्रयत्नोन्नमितानमत्फणै धृते कथञ्चित् फणिनां गणैरधः।

न्यधायिषातामभिदेवकीसुतं सुते न धातुश्चरणौ भुवस्तले।।

7. अधोलिखितस्य श्लोकद्वयस्य सप्रसङ्ग भावार्थः लिख्यताम्-

(क) अशेषतीर्थोपहृता कमण्डलोर्निधाय पाणावृषिणाऽभ्युदीरिताः।

अधौधविध्वंसविधौ पटीयसीर्नतेन मूर्ध्ना हरिरग्रहैदपः।।

(ख) अनन्यगुर्वास्तव केन केवलः पुराणमूर्तेर्महिमाऽवगम्यते।

मनुष्यजन्माऽपि सुरासुरान्गुणैर्भवान्भवच्छेदकरैः करोत्यधः।।

## चतुर्थो वर्गः 7½

8. अर्थस्य भेदोपभेदं निरूप्यताम् ।

9. वाक्यस्वरूपं निरूप्यताम् ।